International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2019; 5(4): 255-260
© 2019 IJSR
www.anantaajournal.com
Received: 01-05-2019
Accepted: 03-06-2019

**Kidambi Pavankumar**
Agama Pandit,
Sri Pancharatragama,
Sri Venkateswara Veda Vijnana Peetham Dharmagiri, Tirumala, Andhra Pradesh, India

**Correspondence**
**Kidambi Pavankumar**
Agama Pandit,
Sri Pancharatragama,
Sri Venkateswara Veda Vijnana Peetham Dharmagiri, Tirumala, Andhra Pradesh, India

# अङ्कुरार्पणे पालिकादि पात्रस्थापनविचारः

**Kidambi Pavankumar**

## प्रस्तावना

यज्ञेकर्मणि अङ्कुरार्पणस्य महत् प्राधन्यं वर्तते। तदर्थं मन्त्रसहितं मृत्सङ्ग्रहणं कार्यम्। तदेवोच्यते.........

अङ्कुरार्पणहीनं यत्सर्वं कर्मविनश्यति।[1]
तस्मात्तेन विहीनन्तु नाचरेत्कर्मदैविकम्।।
मानुषेकर्मणि तथा त्वादौस्यादङ्कुरार्पणम्।
अयुग्मा मानुषेकार्या दैवेयुग्मास्तु पालिकाः।।
दीक्षासंपूर्णतां याति अङ्कुरार्पणकर्मणा।
अङ्कुरार्पणमारभ्य दीक्षितास्सम्प्रकीर्तिताः।।
तत्तत्कर्माङ्गदीक्षां तु आरभेताङ्कुरार्पणे।।

एतैः श्रीमन्नारायणसंहितावाक्यैः प्रातिदैविक,मानुषकर्मसु सर्वेष्वपिकर्मणः आरम्भे कर्मसिध्यर्थं अङ्कुरार्पणं आचरणीयं इति ज्ञायते। तत्र दैविककर्मसु युग्मतया,मानुषकर्मसु अयुग्मतया च पात्रस्थापनं करणीयमिति ज्ञायते। अङ्कुरार्पणप्रारम्भप्रभृत्यैव यज्ञान्तपर्यन्तं आचार्यादि ऋत्विजः दीक्षिताः इति व्यपदिशन्ति।

पालिका घटिकाश्चैव शरावा इति ते स्मृताः।[2]
अङ्कुराणि प्रशस्तानि पात्रेषु त्रिविधेष्वपि।।

अङ्कुरार्पणकर्मणि पालिका,घटिका,शरावः इति त्रीणि पात्राणि प्रशस्ततया प्रतिपादितानि।

---

[1]. श्रीमन्.य.वै.7अ,50तः52प.

[2].श्रीमन्.य.वै.7अ,54श्लो.

**पालिकालक्षणम्.**

साङ्गुलं हस्तमुत्सेधं पालिकानामधाननम्।[3]
षोडशाङ्गुलविस्तारं बिलं सप्ताङ्गुलं भवेत्।।
पादपीठस्य विस्तारमधश्चैकाङ्गुलं स्मृतम्।
उन्मत्तकुसुमाकारं मुखमंभोजसन्निभम्।।

श्री मन्नारायणसंहितायां पालिकालक्षणं एवं विवृतम्। चतुर्विंशत्यङ्गुलोन्नतपरिमाणकं (24अं),षोडशाङ्गुलविस्तारमुखं(16अं),अधोभागेसप्ताङ्गुलपरिमाणकं बिलं(7अं), अष्टाङ्गुल विस्तृतपादपीठं(8अं),सत् उन्मत्तकुसुममिव मुखभागन्तु अम्भोजसदृशं भासमानं पात्रं पालिका।

घटिकालक्षणम्.

द्वाविंशाङ्गुलमायामं घटिकानां प्रकीर्तितम्।[4]
घटिकाःपञ्चवक्रास्युः तन्मध्येतुघटाकृतिः।।
षडङ्गुलसमायामं एतासां मध्यमाननम्।
चतुर्मुखाश्चतुर्दिक्षु चतुरङ्गुलमायताः।।

द्वाविंशत्यङ्गुलोन्नत परिमाणकं(22अं),मध्येघटाकृतिवत्,मुखन्तु षडङ्गुलपरिमाणकं (6अं),कण्ठस्थानेषु चतुर्दिक्षु चतुरङ्गुलपरिमाणकं चतुर्वक्रैः,आहत्य पञ्चवक्रैः विराजमानं पात्रं घटिका इत्युच्यते।

शरावलक्षणम्.

उत्सेधं विंशदङ्गुल्या आयतं द्वादशेन च।[5]
शरावेषु विजानीयात्-----------।।

शरावस्य उत्सेधः विंशत्यङ्गुलपरिमाणपूर्वकः तस्य विस्तारस्तु द्वादशाङ्गुल परिमाणात्मकः भवेत्।इति श्रीमन्नारायणसंहितायां शरावलक्षणं प्रतिपादितम्।

**तालिका 1:** ईश्वरसंहितामनुसृत्य पालिकापरिमाणविशेषः [6]

| | |
|---|---|
| मुखविस्तारः | 16 अं |
| मुखोपरिभागविस्तारः | 1 अं |
| मुखोच्छ्रयः | 8 अं |
| नाळकण्ठभागविस्तारः | 8 अं |
| संपूर्णनालोच्छ्रयः | 12 अं |
| नाळमध्यभागविस्तारः | 6 अं |
| नाळस्यपादभागविस्तारः | 4 अं |
| पादपीठोच्छ्रयः | 4 अं |
| पादपीठविस्तारः | 10 अं |
| पादपीठस्य दार्ढ्यम् | 1 अं |
| संपूर्णपालिकायाः उच्छ्रयस्तु | 25 अं |

उपर्युक्तलक्षणलक्षितायाः पालिकायाः स्वरूपः उन्मत्तकुसुमाकृतिवत् स्यात्। मुखस्तु पद्माकृतिमनुसरेत्।

**तालिका 2:** घटिकाप्रमाणविवरणम् [7]

| | |
|---|---|
| मध्यनाळमुखविस्तारः | 6 अं |
| मध्यनाळपदविस्तारः | 3 अं |
| मध्यनाळोच्छ्रयः | 6 अं |
| घटिकोदरविस्तारः | 16 अं |
| घटिकोदरोच्छ्रयः | 12 अं |
| पादपीठोच्छ्रयः | 4 अं |
| पादपीठविस्तारः | 10 अं |
| पादपीठदार्ढ्यम् | 1अं |
| चतुर्दिक्षुनाळमुखविस्तारः | 4 अं |
| चतुर्दिक्षुनाळमुखोच्छ्रयः | 4अं |
| संपूर्णघटिकोच्छ्रयस्तु | 22 अं |

[3].श्रीमन्.य.वै.73अ,55,56श्लो.

[4].श्रीमन्.य.वै.73अ, 57,58श्लो.

[5].श्रीमन्.य.वै.73अ,59श्लो.

[6].ई.10अ.80तः86प.

[7]. ई.10अ.86तः90प

**तालिका 3:** शरावप्रमाणविवरणम्[8]

| | |
|---|---|
| मुखविस्तारः | 16 अं |
| मुखोच्छ्रयः | 6 अं |
| नाळोच्छ्रयः | 10 अं |
| पीठोच्छ्रयः | 4 अं |
| पादभागेनाळविस्तारः | 3 अं |
| संपूर्णशरावोच्छ्रयस्तु | 20 अं |

एतत् प्रमाणोपेतं पात्रं उत्तमं,पादहीनं मध्यमं,अर्धहीनञ्चाधममिति फलकांक्षिभिः जनैः अतोपि न्यूनतया पात्रासादनं नकर्तव्यमिति ईश्वरसंहितयाप्रस्तूयते।

**तालिका 4:** पुरुषोत्तमसंहितामनुसृत्य पालिकापरिमाणविशेषः[9]

| | |
|---|---|
| पालिकायाः अधोबागोच्छ्रयः | 4 अं |
| अधोभागविस्तारः | 10 अं |
| अवशिष्टपालिकाभागोच्छ्रयः | 21 अं |
| अवशिष्टपालिकाभागविस्तारः | 16 अं |
| मुखोपरिभागविस्तारः | 1 अं |
| संपूर्णपालिकायाः उच्छ्रयः तु | 25 अं |

**तालिका 5:** घटिकापरिमाणविशेषः

| | |
|---|---|
| घटिकाया अधोभागोच्छ्रयः | 4 अं |
| अधोभागविस्तारः | 10 अं |
| अवशिष्टघटिकाभागोच्छ्रयः | 18 अं |
| अवशिष्टघटिकाभागविस्तारः | 12 अं |
| प्रधानमुखनाळविस्तारः | 6 अं |
| चतुर्णां नाळानां चतुर्दिक्षु अङ्गभूतानां विस्तारः | 4 अं |
| संपूर्णघटिकायाः उच्छ्रयस्तु | 22 अं |

**तालिका 6:** शरावपरिमाणविशेषः

| | |
|---|---|
| शरावस्याधोभागोच्छ्रयः | 4 अं |
| शरावस्य अधोभागविस्तारः | 10 अं |
| अवशिष्टशरावभागोच्छ्रयः | 16 अं |
| अवशिष्टशरावभागविस्तारः | 12अं |
| संपूर्णशरावस्य उच्छ्रयस्तु | 20 अं |

विष्णुतिलकसंहितामनुसृत्य पालिकापात्रविषयम्

पालिका,घटिका,शरावादीनां लक्षणानि[10] विष्णुतिलकसंहितायां निर्दिष्टरूपेण नहिलभ्यन्ते।[11] पाद्मसंहितातु श्रीमन्नरायणसंहिताप्रतिपादित लक्षणान्येव अङ्गीकरोति।[12] पुरुषोत्तमसंहितामतमनुसृत्य पालिकोच्छ्रयः पञ्चविंशत्यङ्गुलपरिमाणात्मकः, एवं।

कपिञ्जलसंहितामनुसृत्य पालिकादिपात्रनिर्णयम्

कपिञ्जलसंहितायां अङ्कुरार्पणार्थं सूचित पालिकादिपात्राणां लक्षणविषये,पाद्म, श्रीमन्नारायणसंहितोक्तलक्षणं प्रायः समर्थितं चेदपि पालिका,घटिका,उच्छ्रयविषये शरावः इव एकमेव विंशत्यङ्गुलपरिमाणकं प्रतिपादितम्।तेषां स्थापनविषयेतु प्रत्येकं द्वादशपात्राणि निर्दिष्टानि।

**तालिका 7:** विष्वक्सेन संहितायां पालिकामानम्[13]

| | |
|---|---|
| पालिकाभागस्य उच्छ्रयः | 36 अं |
| मुखविस्तारः | 18 अं |
| पादविस्तारः | 12 अं |

8. ई.10अ.91तः94प.

9. पुरु. 13अ, 7तः

10. वि.ति. 7अ. 20तः.

11. पाद्मे. 24अ. 29तः – 34प.

12. पुरु. 13अ. 7तः – 11प.

13. विष्वक्, 25अ.7तः – 15श्लो

**तालिका 8:** घटिकामानम्

| | |
|---|---|
| घटिकाभागोच्छ्रयः | 24 अं |
| मध्यविस्तारः | 12 अं |
| मुखविस्तारः | 5 अं |
| चतुर्दिक्षु मुखविस्तारः | 5 अं |
| पादविस्तारः | 8 अं |

**तालिका 9:** शरावमानम्

| | |
|---|---|
| शरावस्योच्छ्रयः | 12अं |
| मुखविस्तारः | 12अं |
| पादविस्तारः | 6अं |

सौवर्णाद्याः प्रशस्तास्युः राजता मध्यमाः स्मृताः। [14]
तथैव ताम्रस्त्वधमाः मृण्मया स्त्वधमाधमा।।

अङ्कुरार्पणप्रयोगे पालिकादीनिपात्राणि, यदि हिरण्मयानि भवेयुः तानि उत्तमानीति,यदि रजतमयानि चेत् मध्यमानीति,यदि ताम्रनिर्मितानि चेत् अधमानीति श्रीमन्नारायणसंहिताया उच्यते। अस्मिन् विषये विष्वक्सेनसंहितायां केचनभेदाः वर्तन्ते।

सौवर्णां पालिकां कुर्यात् राजतां घटिकाकृतिम्। [15]
ताम्रैरेव शरावन्तु सर्वेषां ताम्रमेव वा।।
मृद्भिर्वाप्यर्थ सर्वेषां कारयित्वा विचक्षणः।

अनेन प्रमाणेन पालिकाः सुवर्णमयाः,घटिकाश्च रजतमयाः,शरावस्तु ताम्रमयाः अङ्कुरार्पणे यदि उपयुज्यन्ते सर्वधा शुभप्रदमिति ज्ञायते। नोचेत् पालिकादीनि सर्वाणि पात्राणि ताम्रमयानि वा मृण्मयानि वा प्रकल्प्य, अङ्कुरार्पणविधिं कुर्यात्।

**तालिका 9:** अङ्कुरार्पणोपयुक्तपालिकादीनां संख्या श्रीमन्नारायणपाद्मादिसंहितासु उत्तमादिभेदैः निरूपिता।

| **क्रम.सं** | **पालिकादिपात्राणि स्थापनभेदाः** | **पालिकादिपात्राणां संख्या निरूपणम्** |
|---|---|---|
| 1. | उत्तमोत्तमः | प्रत्येकं 36x3=108 |
| 2. | उत्तममध्यमः | प्रत्येकं 16x3=48 |
| 3. | उत्तमाधमः | प्रत्येकं 12x3=36 |
| 4. | मध्यमोत्तमः | प्रत्येकं 8x3=24 |
| 5. | मध्यममध्यमः | प्रत्येकं 4x3=12 |
| 6. | मध्यमाधमः | केवलं पालिकाः 16 |
| 7. | अधमोत्तमः | केवलं पालिकाः 12 |
| 8. | अधममध्यमः | केवलं पालिकाः 8 |
| 9. | अधमाधमः | केवलं पालिकाः 4 |

[14].श्रामन्.य.वै.का.7अ,60श्लो.

[15].विष्व.25अ.5,6श्लो.

पालिकाः एव उपयुज्य क्रियमाणे अङ्कुरार्पणविधौ चतुर्विंशति पालिकास्थापनप्रकारोपि ईश्वरसंहितायां प्रोक्तः। विष्णुतिलकसंहितायां अष्टपालिकास्थापन क्रियाविधिः दर्शितः। विष्वक्सेनसंहितातु षोडशसंख्याकैः पालिका-घटिका-शरावैः विधेयमानं अङ्कुरार्पणविधानं निरूपयामास। एवं एकैकस्यापि पात्रस्य देवता-वर्ण-नामनिर्देशश्च अत्र संहितायां उपलभ्यते। एतेषां अष्टचत्वारिंशत् पात्राणां देवतादि नामपूर्वकविवरणं तत्र पट्टिकायां प्रदश्यते।

**तालिका 10:** पालिकाविषयः

| क्र.सं | नामानि | वर्णानि | देवताः |
|---|---|---|---|
| 1. | सुन्दरः | शुक्लः | वासुदेवः |
| 2. | असुन्दरः | शुक्लः | सङ्कर्षणः |
| 3. | विक्रमः | शुक्लः | प्रद्युम्नः |
| 4. | मुरशासनः | शुक्लः | अनिरुद्धः |
| 5. | वीरसेनः | रक्तः | पुरुषः |
| 6. | विरामः | रक्तः | सत्यः |
| 7. | सोमदत्तः | रक्तः | अच्युतः |
| 8. | महाहनुः | रक्तः | अनन्तः |
| 9. | यज्ञभुक् | श्यामः | शङ्खः |
| 10. | सर्वभुक् | श्यामः | चक्रः |
| 11. | मनुजः | श्यामः | गदा |
| 12. | मर्दनः | श्यामः | पद्मः |
| 13. | अग्निग्रीवः | कृष्णः | मुसलः |
| 14. | हयग्रीवः | कृष्णः | खड्गः |
| 15. | वायुग्रीवः | कृष्णः | शार्ङ्गः |
| 16. | अग्निग्रीवः | कृष्णः | वज्रः |

**तालिका 10:** घटिकावषयः

| क्र.सं | नामानि | वर्णानि | देवताः |
|---|---|---|---|
| 1. | वेगः | शुक्लः | वराहः |
| 2. | अवेगः | शुक्लः | नारसिम्हः |
| 3. | सुवेगः | शुक्लः | श्रीधरः |
| 4. | वायुवेगः | शुक्लः | हयशीर्षकः |
| 5. | अग्निनाथः | रक्तः | जामदग्न्यः |
| 6. | वायुनाथः | रक्तः | रामः |
| 7. | हविर्नाथः | रक्तः | वामनः |
| 8. | हयांपतिः | रक्तः | यदुनन्दनः |
| 9. | सर्वभुक् | श्यामः | नरः |
| 10. | सर्वधृक् | श्यामः | नारायणः |
| 11. | सर्वी | श्यामः | हरिः |
| 12. | सर्वभक्षः | श्यामः | कृष्णः |
| 13. | सुभुजः | कृष्णः | मत्स्यः |
| 14. | दुर्भुजः | कृष्णः | कूर्मः |
| 15. | भुजगः | कृष्णः | तार्क्ष्यः |
| 16. | वह्निजेष्वरः | कृष्णः | अनन्तः |

**तालिका 10:** शरावविषयः

| क्र.सं | नामानि | वर्णानि | देवताः |
|---|---|---|---|
| 1. | राजराजः | सितरक्तः | विष्णुः |
| 2. | विराजः | सितरक्तः | मधुसूदनः |
| 3. | सुकेतुः | सितरक्तः | त्रिविक्रमः |
| 4. | कीर्तिवर्धनः | सितरक्तः | वामनः |
| 5. | इन्द्रकर्मा | सितरक्तः | श्रीधरः |
| 6. | महाकर्मा | सितरक्तः | हृषीकेशः |
| 7. | देवकर्मा | सितरक्तः | पद्मनाभः |
| 8. | मनीषिणः | सितरक्तः | दामोदरः |
| 9. | यज्ञनाथः | सितरक्तः | केशवः |
| 10. | हविर्नाथः | सितरक्तः | नारायणः |
| 11. | सुलग्नः | सितरक्तः | माधवः |
| 12. | सुरनन्दनः | सितरक्तः | गोविन्दः |
| 13. | मणिप्रियः | सितरक्तः | हंसः |
| 14. | महामायः | सितरक्तः | बलः |
| 15. | देवमायः | सितरक्तः | कपिलः |
| 16. | सुखप्रियः | सितरक्तः | हलः |

अपि च पालिकाः सर्वाः शुक्लवर्णाः,घटिकाः कृष्णवर्णाः,शरावाश्च रक्तवर्णाः भवितुमर्हन्ति इति अन्यः अभिप्रायः विष्वक्सेनसंहितायां निगदितः।

अङ्कुरावापनस्थाने मण्टपं कल्पयेद्गुरुः। [16]
शुभेभिलषिते चैव प्रदेशे तत्र पद्मज।।
चतुर्दिक्षु चतुर्द्वारान् मण्टपस्य प्रकल्पयेत्।
दर्भमाला परिक्षिप्तं मुक्तादामविराजितम्।।
पुष्पमालैश्शोभितञ्च दीपमालादिभिर्युतम्।
वितानाद्यैर्भूषितञ्च गोमयालिक्तभूतलम्।।
सुधाचूर्णादिभिर्युक्तं रङ्गवल्याद्यलङ्कृतम्।
मण्टपं कारयेदेवमङ्कुरार्पणकर्मणि।।
अथवा चोत्तरेदेशे ईशान्यां वा शुभेभुवि।
कारयेद्यज्ञशालायां अङ्कुरार्थन्तुवेदिकाम्।।
एवं प्रकल्प्य पूर्वन्तु गृह्णीयान्मृत्तिकां ततः।।

अनेन प्रकारेण पात्राणि संगृह्य,अङ्कुरार्पणविधिं विधातुं आचार्यमतानुसारेण पवित्रप्रदेशे चतुर्द्वारयुतं मण्टपं परिकल्पयेत्। तच्च मण्टपं कुशैः,मुक्ताभिः, पुष्पदीपमालाभिश्च सम्यगलङ्कृत्य,गोमयेनानुलिप्य,सुधाचूर्णेन रङ्गवल्यादीनि विलिख्य, अङ्कुरार्पणं कुर्यात्,अथवा यज्ञशालायाः उत्तरभागे,ईशान्ये वा वेदिकां सज्जीकृत्य,अङ्कुरार्पणं निर्वहेदिति श्रीमन्नारायणसंहितोक्तिः।

## संदर्भ


1. श्रीमन्नारायणसंहिता – यज्ञवैभवकाण्ड - श्रीमन्-य-वै
2. ईश्वरसंहिता - ई
3. पाद्मसंहिता - पाद्मे
4. पुरुषोत्तमसंहिता - पुरु
5. विष्णुतिलकसंहिता - वि.ति
6. विष्वक्सेनसंहिता - विष्व


[16].श्रीमन्.य.वै.का.7अ,65-70श्लो